**MASTER OF ARTS EXAMINATION, 2025**

**(2nd Year, 4th Semester)**

**SANSKRIT**

**Course:XIX/D**

**(Select Topics on Socio-political Aspects of The Mahābhārata(Śāntiparvan) and Rāmāyaṇa(Ayodhyā Kāṇḍa)**

**Time: Two Hours** **Full Marks: 30**

*The figures in the margin indicate full Marks.*

## विभागः- क

१. निम्नलिखितेषु पञ्च प्रश्नाः सुरगिरा देवनागर्या लिप्या च समाधेया। 5x1=5

क। भारद्वाजदृष्ट्या केषां व्यसनानां युक्त्या सेवा करणीया ?

ख। कदा गुरोरपि दण्डो विधातव्यः?

ग। शूरं भीरुञ्च केन भेदयेत्?

घ। 'अनुबन्धं तथा ज्ञात्वा पीड़ाञ्च परिवर्जयेत्।' अत्र अनुबन्धमिति पदेन किं सूचितम्?

ङ। किमर्थं राजा प्रजाकृतपापस्य चतुर्भागं भुङ्क्ते इति श्रुतिः?

च। राजा कीदृशं कर्म बहुभिः पुरुषैः कारयेत्?

छ। के राष्ट्रस्योपघातकाः?

२. निम्नोक्तेषु प्रश्नत्रयं समाधेयम्। 5x3=15

क। भीष्ममतानुसारेण राज्ञः करग्रहणनीतेः गुरुत्वं विचार्यताम्।

ख। किमर्थं भूतिमिच्छता राज्ञा मृदुनीतिः अवलम्बनीया? रिपुं प्रति च तेन किमाचरितव्यम्? 3 + 2

ग। युधिष्ठिरं प्रति भीष्मेण राष्ट्रस्य रक्षणोपायः यथा वर्णितःतथा आलोच्यताम्।

घ। सप्रसङ्गं व्याख्या कार्या।

सुपुष्पितः स्यादफलः फलवान् स्याद्दुरारुहः।<br>
आमः स्यात् पक्वसङ्काशो न शीर्य्येत कस्यचित्।।

## विभागः- ख

३. कस्यचिदेकस्य प्रश्नस्योत्तरं लेखनीयम्। 5

क। भरतं प्रति रामस्य वचने अयोध्यायाः यादृशी समृद्धिः प्रकटिता समासेन तदालोच्यताम्।

ख। चतुर्दश-राजदोषा रामस्य वचनानुसारं लेखनीयाः।

४. निम्नलिखितेषु पञ्च प्रश्नाः सुरगिरा देवनागर्या लिप्या च समाधेया। 5x1=5

क। कुलपुत्रस्य रक्षणे का आवश्यकता?

ख। दूतस्य कीदृशो गुणो भवेत्?

ग। का नाम वार्ता?

घ। राजकोशस्य रक्षणविषये रामेण किमुक्तम्?

ङ। सप्तवर्ग-पदेन केषां ग्रहणम्?

च। दुर्गाणि कैः प्रतिपूर्णानि?

छ। तीर्थमित्यस्य कोऽर्थः ?

******